नय। कौरवे तपत्यपत्ये तपतीशब्दे दृश्यम्। तपत्या उपाख्यानं ष्यञ्। २तपत्युपाख्याने न०। तापत्यमथ वाशिष्ठमौर्वं चाख्यानमुत्तमम्" भा० आ० १अ०। तदाख्यानं च भा०आ० चैत्ररथपर्वणि १७२ अध्याये दृश्यम्।

**तापत्रय** न० ६त०। आध्यात्मिकाधिदैविकाधिभौतिकरूपे दुःखत्रये। "आध्यात्मिकादि मैत्रेय! ज्ञात्वा तापत्रयं बुधः। उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं फलम्" विष्णुपु०।

**तापदुःख** न० तापरूपं दुःखम्। "पातञ्जलोक्ते दुःखभेदे "परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" सू०। "ते जन्मायुर्भोगाः पुण्यहेतुकाः सुखफलाः, अपुण्यहेतुकाः दुःखफला इति। यथा चेदं दुःखं प्रतिकूलात्मकं एवं विषयसुखकालेऽपि दुःखमस्त्येव प्रतिकूलात्मकं योगिनः। कथं तदुपपद्यते"। "अथ का तापदुःखता सर्वस्य द्वेषानुविद्धश्चेतनाचेतनसाधनाधीनस्तापानुभव इति। तत्रास्ति द्वेषजः कर्म्माशयः सुखसाधनानि च प्रार्थयानः कायेन वाचा मनसा च परिस्पन्दते ततः परमनुगृह्णात्युपहन्ति वेति परानुग्रहपीड़ाभ्यां धर्म्माधर्मावुपचिनोति स कर्म्माशयो लोभान्मोहाच्च भवतीत्येषा तापदुःखतोच्यते" भा०। "ते जन्मायुर्भोगा इति यद्यपि जन्मायुषोरेव ह्लादपरितापपूर्वभावितया तत्फलत्वं न तु भोगस्य ह्लादपरितापोदयानन्तरभाविनस्तदनुभवात्मनस्तथाप्यनुभाव्यतया भोग्यतया भोगकर्म्मतामात्रेण भोगफलत्वमिति मन्तव्यं नन्वपुण्यहेतुका जात्यायुर्भोगाः परितापफला भवन्तु हेयाः प्रतिकूलवेदनीयत्वात्। कस्मात्? पुनः पुण्यहेतवस्त्यज्यन्ते सुखफलाः अनुकूलवेदनीयत्वात्, न चैषां प्रत्यात्मवेदनीयानुकूलता शक्या सहस्रेणाप्यनुमानागमैरपाकर्त्तुं, न च ह्लादपरितापौ परस्पराविनाभूतौ यतो ह्लाद उपादीयमानेनैव परितापोऽप्यवर्जनीयतयापतेत् तयोर्भिन्नहेतुकत्वाद्भिन्नरूपत्वात् चेत्यत आह यथाचेदमिति" विवरणम्।

**तापन** न० तप–णिच्–भावे ल्युट्। (तापान) १तापकरणे हेमच०। तापि–कर्त्तरि ल्यु। २सूर्य्ये ३कामवाणभेदे पु० जटाध०। ४सूर्य्यकान्तमणौ राजनि०। ५अर्कनामनामके अर्कवृक्षे च। ६तापके त्रि०। "ततोऽम्बराच्चिन्तितमात्रमागतं महाप्रभं चक्रममित्रतापनम्" भा० आ० १९अ०। "ततस्तु राजानममित्रतापनं समीक्ष्यते तस्य नृपस्य मन्त्रिणः" ४४ अ०।

**तापनीय** न० उपनिषद्भेदे। उपनिषच्छब्दे १२२२पृ० दृश्यम्। गोपालतापनीयः नृसिंहतापनीयः। तपनीयस्य स्वर्णस्य विकारः अण्। २स्वर्णमये त्रि० "तापनीये तथा घण्टे कक्षोपरि विलम्बिते" हरिवं० ८७ अ०। जातरूपेभ्यः परिमाणे अण्। ३स्वर्णनिष्कपरिमाणे सुवर्णे न०।

**तापश्चित** न० तपसि चीयते चि–क्त स्वार्थे अण्। सत्त्रभेदे तद्विधानादि कात्या० श्रौ० २४।५।१। यथा "तापश्चितम् दीक्षाः संवत्सरमुपसदश्च तथा सुत्याः" सू० "तापश्चितमिति सत्रनाम तत्र दीक्षाः संवत्सरं भवन्ति उपसदः सुत्याश्च" इदानीमह्नान्याह अत्र सुत्या आह" कर्कः "गवामयनेनेयुः" २सू०। गवामयनमेव कर्त्तव्यमित्यर्थः।"अग्निष्टोमेन वा" ३सू० "ईयुः अपूर्वस्यायमग्निष्टोमः नैकाहिको न द्वादशाहिकः संस्थामात्रोपदेशात्। अग्निष्टोमसंस्थेन ज्योतिष्टोमेन पूरणं कर्त्तव्यम्" कर्कः। शत०ब्रा०१०।२।५।२ तन्निरुक्तिर्दर्शिता यथा "एतदु ह यज्ञे तपः। यदुपसदस्तपो वा उपसदस्तद्यत्तपसि चीयते तस्मात् तापश्चितस्तद्वै यावदेवोपसद्भिश्चरन्ति तावत् प्रवर्ग्येण संवत्सरमेवोपसद्भिश्चरन्ति संवत्सरम्प्रवर्ग्येण" "यावतीरुपसदः कुर्य्यात्तावद्भिः प्रवर्ग्यैश्चरितव्यम् उपसदः तापश्चिते चयने संवत्सरसंमिताः" भा०।

**तापस** त्रि० तपस्तच्चरणं शीलमस्य छत्रा०ण। १तपश्चरणशीले स्त्रियां टाप्। तपोऽस्त्यस्य "अण् च" पा० अण्। तपोविशिष्टे त्रि०। "तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाचरेत्" मनुः। "सीदन्ति तापसकुलानि सगोकुलानि" ह० स० १९ अ०। स्त्रियां ङीप् "अब्रवीन्न स्मरामीति कस्य त्वं दुष्टतापसि" भा० आ० ७४ अ०।

**तापसतरु** पु० तापसहितस्तरुः शा० त०। इङ्गुदीवृक्षे अमरः। तापसद्रुमादयोऽप्यत्र।

**तापसद्रुमसन्निभा** स्त्री तापसद्रुमेण तुल्या निभा० नि० स०। गर्भदात्रीक्षुपभेदे राजनि०।

**तापसपत्री** स्त्री तापसप्रियं पत्रमस्याः जातित्वात् ङीष्। दमनकवृक्षे राजनि०।

**तापसप्रिय** पु० तापसानां प्रियः छायाप्रदत्वात्। १पियालवृक्षे राजनि०। २तापसप्रियमात्रे त्रि०।

**तापसेष्टा** स्त्री तापसेन इष्टा। १द्राक्षायां राजनि० २तापसाभिलषिते त्रि०।

**तापस्य** न० तापसस्य धर्म्मः ष्यञ्। तापसधर्म्मे "स्त्रीधर्मयोगं तापस्यं मोक्षं संन्यासमेव च। राज्ञश्च धर्ममखिलं